# 30 - त्रिंश दशकम्
## वामन अवतारम्

शक्रेण संयति हतोऽपि बलिर् महात्मा
शुक्रेण जीवित तनुः क्रतु वर्धितोष्मा ।
विक्रान्तिमान् भय निलीन सुरां त्रिलोकीं
चक्रे वशे स तव चक्र मुखा दभीतः ॥ ॥30-1॥

पुत्रार्ति दर्शन वशा ददितिर् विषण्णा
तं काश्यपं निज पतिं शरणं प्रपन्ना ।
त्वत् पूजनं तदुदितं हि पयोव्रताख्यं
सा द्वादशाह मचरत् त्वयि भक्ति पूर्णा ॥ ॥30-2॥

तस्या वधौ त्वयि निलीन मते रमुष्याः
श्यामश् चतुर्भुज वपुस् स्वय माविरासीः ।
नम्रां च तामिह भवत् तनयो भवेयं
गोप्यं मदीक्षण मिति प्रलपन् नयासीः ॥ ॥30-3॥

त्वं काश्यपे तपसि सन्निदधत् तदानीं
प्राप्तोऽसि गर्भ मदितेः प्रणुतो विधात्रा ।
प्रासूत च प्रकट वैष्णव दिव्य रूपं
सा द्वादशी श्रवण पुण्य दिने भवन्तं ॥ ॥30-4॥

पुण्याश्रमं तमभिवर्षति पुष्प वर्षैः
हर्षाकुले सुरकुले कृत तूर्य घोषे ।
बध्वाऽञ्जलिं जय जयेति नुतः पितृभ्यां
त्वं तत्क्षणे पटुतमं वटु रूप माधाः ॥ ॥30-5॥

तावत् प्रजापति मुखै रुपनीय मौञ्जी
दण्डाजिनाक्ष वलया दिभि रर्च्यमानः ।
देदीप्य मान वपुरीश कृताग्नि कार्यः
त्वं प्रास्थिथा बलि गृहं प्रकृताश्वमेधम् ॥ ॥30-6॥

गात्रेण भावि महिमो चित गौरवं प्राक्
व्यावृण्व तेव धरणीं चलयन् नयासीः ।
छत्रं परोष्म तिरणार्थ मिवा दधानः
दण्डं च दानव जनेष्विव सन्नि धातुम् ॥ ॥30-7॥

तां नर्मदोत्तर तटे हय मेध शालाम्
आसेदुषि त्वयि रुचा तव रुद्ध नेत्रैः ।
भास्वान् किमेष दहनो नु सनत्कुमारः
योगी नु कोऽय मिति शुक्र मुखैश् शशङ्के ॥ ॥30-8॥

आनीत माशु भृगुभिर् महसाऽभिभूतैः
त्वां रम्य रूप मसुरः पुलका वृताङ्गः ।
भक्त्या समेत्य सुकृती परिणिज्य पादौ
तत्तोय मन्व धृत मूर्धनि तीर्थ तीर्थम् ॥ ॥30-9॥

प्रह्लाद वंश जतया क्रतुभिर् द्विजेषु
विश्वासतो नु तदिदं दितिजोऽपि लेभे ।
यत्ते पदाम्बु गिरिशस्य शिरोभि लाल्यं
स त्वं विभो गुरु पुरालय पालयेथाः ॥ ॥30-10॥